# ॥ પવમાનસૂક્તમ્ ॥

.. PavamAnasukta ..

sanskritdocuments.org

August 20, 2017

# .. PavamAnasukta ..

# ॥ પવમાનસૂક્તમ્ ॥

## Sanskrit Document Information

Text title : pavamAnasUkta

File name : pavamana.itx

Category : sUkta, veda, svara

Location : doc_veda

Author : Vedic Tradition

Language : Sanskrit

Subject : philosophy/hinduism

Transliterated by : Rajagopal Iyer (rajsand at yahoo.com)

Proofread by : Rajagopal Iyer (rajsand at yahoo.com)

Description-comments : mantrapuShpam

Latest update : June 14, 2000

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ પવમાનસૂક્તમ્ ॥

( પુણ્યાહવાચનમ્ )

તૈત્તિરીય સંહિતા । કાણ્ડમ્ - ૫, પ્રપાઠકઃ - ૬, અનુવાકઃ - ૧

તૈત્તિરીય બ્રાહ્મણમ્ । અષ્ટકમ્ - ૧, પ્રશ્નઃ - ૪, અનુવાકઃ - ૮

ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય। ગાતું યજ્ઞપતયે । દૈવીસ્સ્વસ્તિરસ્તુ નઃ ।
સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ । શન્નો અસ્તુ દ્વિપદે। શં ચતુષ્પદે ।
ૐ શાન્તિશ્શાન્તિશ્શાન્તિઃ ।

ૐ ॥ હિરણ્યવર્ણાઃ શુચયઃ પાવકા યાસુ જાતઃ કશ્યપો યાસ્વિન્દ્રઃ ।
અગ્નિં યા ગર્ભં દધિરે વિરૂપાસ્તા ન આપશ્શꣳ સ્યોના ભવન્તુ ॥
યાસાꣳ રાજા વરુણો યાતિ મધ્યે સત્યાનૃતે અવપશ્યં જનાનામ્ ।
મધુશ્ચુતશ્શુચયો યાઃ પાવકાસ્તા ન આપશ્શꣳ સ્યોના ભવન્તુ ॥
યાસાં દેવા દિવિ કૃણ્વન્તિ ભક્ષં યા અન્તરિક્ષે બહુધા ભવન્તિ ।
યાઃ પૃથિવીં પયસોન્દન્તિ શુક્રાસ્તા ન આપશ્શꣳ સ્યોના ભવન્તુ ॥
શિવેન મા ચક્ષુષા પશ્યતાઽઽપશ્શિવયા તનુવોપ સ્પૃશત ત્વચં મે ।
સર્વાꣳ અગ્નીꣳ રપ્સુષદો હુવે વો મયિ વર્ચો બલમોજો નિ ધત્ત ॥
પવમાનસ્સુવર્જનઃ । પવિત્રેણ વિચર્ષણિઃ । યઃ પોતા સ પુનાતુ મા । પુનન્તુ મા દેવજનાઃ ।
પુનન્તુ મનવો ધિયા । પુનન્તુ વિશ્વ આયવઃ । જાતવેદઃ પવિત્રવત્ । પવિત્રેણ પુનાહિ મા ।
શુક્રેણ દેવદીદ્યત્ । અગ્ને ક્રત્વા ક્રતૂꣳ રનુ। યત્તે પવિત્રમર્ચિષિ। અગ્ને વિતતમન્તરા ।
બ્રહ્મ તેન પુનીમહે । ઉભાભ્યાં દેવસવિતઃ । પવિત્રેણ સવેન ચ । ઇદં બ્રહ્મ પુનીમહે ।
વૈશ્વદેવી પુનતી દેવ્યાગાત્ । યસ્યૈ બહ્વીસ્તનુવો વીતપૃષ્ઠાઃ ।
તયા મદન્તઃ સધમાદ્યેષુ । વયꣳ સ્યામ પતયો રયીણામ્ ।
વૈશ્વાનરો રશ્મિભિર્મા પુનાતુ । વાતઃ પ્રાણેનેષિરો મયો ભૂઃ ।
દ્યાવાપૃથિવી પયસા પયોભિઃ । ઋતાવરી યજ્ઞિયે મા પુનીતામ્ ।
બૃહદ્ભિઃ સવિતસ્તૃભિઃ । વર્ષિષ્ઠૈર્દેવમન્મભિઃ ।
અગ્ને દક્ષૈઃ પુનાહિ મા । યેન દેવા અપુનત ।
યેનાપો દિવ્યંકશઃ । તેન દિવ્યેન બ્રહ્મણા । ઇદં બ્રહ્મ પુનીમહે । યઃ પાવમાનીરધ્યેતિ।

ઋષિભિસ્સમ્ભૃત ँ રસમ્। સર્વ ँ સ પૂતમશ્નાતિ ।
સ્વદિતં માતરિશ્વના । પાવમાનીર્યો અધ્યેતિ।
ઋષિભિસ્સમ્ભૃત ँ રસમ્। તસ્મૈ સરસ્વતી દુહે । ક્ષીર ँ સર્પિર્મધૂદકમ્॥
પાવમાનીસ્સ્વસ્ત્યયનીઃ । સુદુઘાહિ પયસ્વતીઃ ।
ઋષિભિસ્સમ્ભૃતો રસઃ । બ્રાહ્મણેષ્વમૃત ँ હિતમ્ ।
પાવમાનીર્દિશન્તુ નઃ । ઇમં લોકમથો અમુમ્ ।
કામાન્થ્સમર્ધયન્તુ નઃ । દેવીર્દેવૈઃ સમાભૃતાઃ ।
પાવમાનીસ્સ્વસ્ત્યયનીઃ । સુદુઘાહિ ઘૃતશ્ચુતઃ ।
ઋષિભિસ્સંભૃતો રસઃ । બ્રાહ્મણેષ્વમૃત ँ હિતમ્ ।
યેન દેવાઃ પવિત્રેણ । આત્માનં પુનતે સદા।
તેન સહસ્રધારેણ । પાવમાન્યઃ પુનન્તુ મા ।
પ્રાજાપત્યં પવિત્રમ્। શતોધ્યામ ँ હિરણ્મયમ્।
તેન બ્રહ્મ વિદો વયમ્ । પૂતં બ્રહ્મ પુનીમહે ।
ઇન્દ્રસ્સુનીતી સહમા પુનાતુ । સોમસ્સ્વસ્ત્યા વરુણસ્સમીચ્યા।
યમો રાજા પ્રમૃણાભિઃ પુનાતુ મા । જાતવેદા મોર્જયન્ત્યા પુનાતુ । ભૂર્ભુવસ્સુવઃ ।
ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય। ગાતું યજ્ઞપતયે । દૈવીસ્સ્વસ્તિરસ્તુ નઃ ।
સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ । શન્નો અસ્તુ દ્વિપદે। શં ચતુષ્પદે ।
ૐ શાન્તિશ્શાન્તિશ્શાન્તિઃ ।

Encoded with Accents by Rajagopal Iyer rajsand@yahoo.com

.. PavamAnasukta ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*